ततः कलात्मकं तत्शक्तस्थं काथं कुम्भे निःक्षिपेत्। ततोऽश्वत्थपनसचूतपल्लवैरिन्द्रवल्लीवेष्टितैः कल्पवृक्षबुद्ध्या कुम्भवक्त्रं पिधाय तस्मिन् वक्त्रे सफलाक्षतं चषकं कल्पवृक्षफलबुद्ध्या स्थापयेत्। ततः कुम्भं निर्म्मलेन क्षौमयुग्मेन संवेष्ट्य मूलेन कुम्भे मूर्त्तिं सङ्कल्प्य यथोक्तरूपेण देवतां ध्यात्वा तस्यामावाहनादिकं कृत्वा पूजयेत्। देवताङ्गे षडङ्गन्यासं कृत्वा धेनुमुद्रापरमीकरणमुद्रे प्रदर्श्य प्राणप्रतिष्ठां कृत्वा षोड़शोपचारादिभिः पूजयेत्। ततोऽष्टोत्तरं सहस्रं शतं वा संजप्य जपं समर्पयेत्। ततो मन्त्रस्य दशसंस्कारान् कृत्वा गुरुः शिष्यमानीय मन्त्रेण शिष्यनेत्रं वस्त्रेणाच्छाद्य शिष्याञ्जलिं पुष्पैः पूरयित्वा गुरुः स्वयमेव मन्त्रं जपन् कलसे देवताप्रीत्यै क्षिपेत्। ततो नेत्रबन्धनं दूरीकृत्य दर्भास्तरे आसीनं शिष्यं स्वकृतपूजाक्रमाद्भूतशुद्ध्यादिकं विधाय तत्तन्मन्त्रोक्तन्यासान् शिष्यस्य देहे कुर्य्यात्। कुम्भस्थां देवतां पुनः पञ्चोपचारैः संपूज्याबद्धृतं शिष्यमन्यस्मिन्नुपवेशयेत्। ततो मङ्गलाचारपूर्व्वकं तत्कुम्भं समुद्धृत्य तन्मुखस्थान् सुरद्रुमरूपान् पल्लवान् शिष्यशिरसि निधाय मातृकां मनसा जपन् मूलेन साधितैस्तोयैर्वशिष्ठसंहितोक्ताभिषेकमन्त्रैस्तमभिषिञ्चेत्। शिष्योऽवशिष्टजलेनाचम्य वाससी परिधाय गुरोः सन्निधावुपविशेत्। ततस्तामेव गुरुरात्मनो देवतां शिष्यसंक्रान्तां तयोरैक्यं विभाव्य गन्धादिभिः पूजयेत्। ततो मन्त्रेण शिष्यस्य शिखां बद्ध्वा संरक्ष्य शिष्यशरीरे कलान्यासं कुर्य्यात्। ततः शिष्यशिरसि हस्तं दत्त्वा अष्टोत्तरशतं जप्त्वा अमुकमन्त्रं तेऽहं ददामीति शिष्यहस्ते जलं दद्यात्। ददस्वेति शिष्यो ब्रूयात्। तत ऋष्यादियुक्तं मन्त्रं गुरुर्द्विजातीनां दक्षिणकर्णे त्रिः श्रावयेत् वामे सकृत्। स्त्रीशूद्राणां वामकर्णे त्रिः श्रावयेत् दक्षिणे सकृत्। ततः शिष्यो गुरुचरणे पतित एव तिष्ठेत्। ततो गुरुर्म्मन्त्रेण तमुत्थापयेत्। ततः शिष्यो लब्धमन्त्रं अष्टोत्तरशतं जपेत्। ततः शिष्यः कुशतिलजलान्यादाय गुरवे दक्षिणां सुवर्णं काञ्चनं वा दद्यात्। दीक्षायज्ञसामग्रीश्च निवेदयेत्। अन्यांश्च ब्राह्मणान् परितोषयेत्। गुरुः स्वशक्तिरक्षणार्थाय अष्टाधिकं सहस्रं शतं वा मन्त्रं जपेत्। ततः शिष्यो मिष्टान्नपानादिना ब्राह्मणान् परितोष्य स्वयं भुञ्जीत। दीक्षादिवसे गुरुशिष्ययोरुपवासे दोषः। इति तन्त्रसारोक्ता कलावतीदीक्षा समाप्ता॥

कलाविकः, पुं, (कलं आविकायति विशेषेण रौतीति कल+आ+वि+कै+कः।) कुक्कुटः। इति त्रिकाण्डशेषः॥

कलाविकलः, पुं, (कलः मधुराव्यक्तः आविकलः रवो यस्य सः। यद्वा कलया कामावेशेन विकलः चञ्चलः।) चटकः। इति शब्दरत्नावली॥

कलाहकः, पुं, (कलमाहन्तीति। कल+आ+हन्+डः। संज्ञायां कन्।) काहलवाद्यम्। इति शब्दरत्नावली।

कलिः, पुं, (कलते कलेराश्रयत्वेन वर्त्तते इति। कल+"सर्व्वधातुभ्य इन्"। उणां ४।११७। इति इन्।) विभीतकवृक्षः। (विभीतकस्य कलिद्रुमत्वकारणमुक्तं यथा, वामने २७ अध्याये।
"इत्येवमुक्तो देवेन ब्रह्मणा कलिरव्ययः।
दीनान् दृष्ट्वा च शक्रादीन् विभीतकवनं ययौ"॥
अस्य गुणादिकं विभीतकशब्दे द्रष्टव्यम्॥ * ॥
कलते स्पर्द्धते इति कल+"सर्व्वधातुभ्यः इन्"। उणां-४।११७। इति इन्।) शूरः। (कलन्ते स्पर्द्धमाना भाषन्तेऽस्मिन्निति। कल+"सर्व्वधातुभ्य इन्"। उणां ४। ११७। इति इन्।) विवादः। (यथा, भागवते ९। ६। ४४।
"तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदम्।
ममानुरूपो नायं व इति तद्गतचेतसाम्"॥)
युद्धम्। (कल्यते पापेषु निक्षिप्यते अनेन यद्वा कलयति पापेन जड़यति कलुषितं करोति। कल+इन्।) अन्त्ययुगम्। इति हेमचन्द्रः॥

तस्योत्पत्तिर्यथा।

"प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः।
ससर्ज्ज घोरं मलिनं पृष्ठदेशात् सपातकम्॥
सचाधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात्।
श्रवणात् स्मरणाल्लोकः सर्व्वपापैः प्रमुच्यते॥
अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना।
तस्याः पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः॥
स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम्।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत्॥
स हिंसायां भगिन्यान्तु जनयामास तत्कलिम्।
वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम्॥
काकोदरं करालास्यं लोलजिह्वं भयानकम्।
पूतिगन्धं द्यूतमद्यस्त्रीसुवर्णकृताश्रयम्॥
भगिन्यान्तु दुरुक्त्यां स भयं पुत्त्रञ्च कन्यकाम्।
मृत्युं संजनयामास तयोश्च निरयोऽभवत्॥
यातनायां भगिन्यान्तु लोभपुत्त्रायुतायुतम्।
इत्थं कलिकुले जाता बहवो धर्म्मनिन्दकाः"॥
इति कल्किपुराणे १ अध्यायः॥ * ॥

कलिधर्म्मो यथा।

"यदा सदानृतं तन्द्रानिद्रा हिंसा विषादनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥
यस्मिन् जनाः कामिनः स्युः शश्वत्कटुकभाषिणः।
दस्युकृष्टा जनपदा वेदाः पाषण्डदूषिताः॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः।
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः॥
तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः।
ह्रस्वकाया महाहाराश्चौर्य्यमायोरुसाहसाः॥
त्यक्ष्यन्ति भृत्याश्च पतिं तापसास्त्वखिलं व्रतं।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः॥
उद्विग्नाश्चानलङ्काराः पिशाचसदृशाः प्रजाः।
अस्नातभोजनेनाग्निदेवतातिथिपूजनम्॥
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्।
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक॥
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः।
शिरःकण्डूयनपरा आज्ञां भेत्स्यन्ति सत्पतेः॥
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः॥
कलेर्द्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः फलम्।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्॥
तस्माद्ध्येयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक"॥
इति गारुड़े युगधर्म्मे २२७ अध्यायः॥
(माघिपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः॥)
तद्युगमानम्। द्वात्रिंशत्सहस्राधिकचतुर्लक्षवत्सराः (४३२०००)।
(आर्य्यभट्टमतेऽत्र १५७७९१७५० दिवसाः।
सूर्य्यसिद्धान्तमते १५७७९१७८२। ४८दिवसाः।
ज्योतिषसैद्धान्तिकमते च १५७७९१७८२ दिवसाः॥
अतो वर्षमानमार्य्यभट्टमते ३६५।१५।३१।१५। दिवसाः।
सूर्य्यसिद्धान्तमते ३६५।१५।३१।३१।२४। दिवसाः।
ज्योतिषसैद्धान्तिकमते च ३६५। १५। ३१। ३० दिवसाः॥)
तस्यातीताब्दाः १८०९ शाकपर्य्यन्तं ४९८८॥

(कलेस्त्रिपञ्चाशदधिकषट्शतमितेषु (६५३) वत्सरेषु गतेषु युधिष्ठिरादयो जाताः। यदुक्तं राजतरङ्गिण्यां १। ५१।
"शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः"॥

ऋतुपक्षशरद्विमितेषु(२५२६) युधिष्ठिराब्देषु कलेर्यद्दसिन्ध्विन्दुनेत्रमितेषु(३१७९)वत्सरेषु गतेषु च महाविषुवसंक्रान्त्यां शालिवाहनस्य राज्ञो जन्मदिनमारभ्य शकाब्दः प्रवर्त्तितः। यदुक्तं तत्रैव १। ५६।
"आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विपञ्चद्वियुतः शककालस्तस्य राज्यस्य"॥ अयन्तु महाविषुवसंक्रान्तिमधिगम्य परिगणितो भवति॥

कलेश्चतुश्चत्वारिंशदधिकत्रिसहस्रपरिमितेषु (३०४४) वत्सरेषु गतेषु चैत्रशुक्लप्रतिपदि उज्जयिनीपतेर्विक्रमादित्यस्य राज्यप्राप्तिकालमारभ्य संवत् इत्याख्यया प्रसिद्धो वत्सरः प्रचलितः। अयन्तु चैत्रशुक्लप्रतिपत्तिथिमधिगम्य परिगणितो भवति॥

कलेरेकोर्द्धशताधिकत्रिसहस्रपरिमितेषु (३१०१) वत्सरेषु गतेषु प्रायशो सौरपौषस्य अष्टादशदिवसे यीशुखीष्टीयाब्दः प्रचलितः॥

पञ्चनवत्यूर्द्धषट्शताधिकत्रिसहस्रपरिमितेषु (३६९५) कलेरतीताब्देषु सप्तदशाधिकपञ्चशतमिते (५१७) च शकाब्दे प्रचलति भाद्रशुक्लद्वादश्यां उत्कलदेशप्रचलितः विलायति इत्याख्यया प्रसिद्धो वत्सरः प्रवर्त्तितः। अयन्तु भाद्रशुक्लद्वादशीमधिगम्य परिगणितो भवति॥

त्रयोविंशत्यूर्द्धसप्तशताधिकत्रिसहस्रपरिमितेषु (३७२३) कलेरतीताब्देषु पञ्चचत्वारिंशदधिकपञ्चशतमिते (५४५) च शकाब्दे प्रचलति ज्यैष्ठस्य विंशतितमदिवसीय शुक्रवारात् महम्मदस्य मक्का-